ष्टं स्वीः इति पत्नीमुदानयति सर्वे: अथतं प्रत्येत्य ली थैन विहारं प्रविशंति। ततः
प त्युत्तरेण हविर्धानं दक्षिणेनाग्नीं अंत्वग। त्वा पूर्वेण द्वारेण सदः प्रविश्याग्रेण
प्रशास्त्रीयं धिष्ण्यं परीत्य दक्षिणेन गत्वा परेण सर्वान्। धिष्ण्यान् गत्वा परेण
नेष्टुर्धिष्ण्यं गत्वा। वसुभ्यो रुद्रेभ्य आदित्ये॰भ्यः पत्नेजनीः सादयामि। इति
पत्नेजनीः सादयति। चात्वालोत्करं कुंभ्या दीनामा दातारः सहाध्वर्यो दिभि

११० यंति। पत्नीयथेतं प्रसेत्स्यैवं सर्जेन होमीयमार्गेण प्राग्वंशमेव प्रविशति अध्वर्युः
संवोदधातु वरुणः समिंद्रः सं धाता संबृहस्पतिः त्वष्टा विष्णुः प्रजायासंरराणो यजमानाय द्रविणं दधातु यथा धुरं धुरो धूर्भिः कल्पतां। इत्युपरि चात्वाले
होतृचमसं मैत्रावरुणचमसं [illegible] सं च संस्पर्शयन् होतृचमसेव स
तीवरीणामेकदेशं निषिच्य तान् होतृचमसीयानामेकदेशं मैत्रावरुण
चमस आनयति। ततो मैत्रावरुणचमसादेकदेशं होतृचमस आनयति।
संवो नस्तु वरुणः समिंद्रः सं धाता सं बृहस्पतिः त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु यथा धुरं धुरो धूर्भिः कल्पंतां। अथ होतृचमस्या अपः मैत्रावरुणचमसीयाश्च छिद्रावत्यां तस्मिन्नेव देशे प्रचरणीस्थाना

ज्यनसमनक्ति। सर्वहोतृचमसस्याभिरद्भिः सहहोतुरंतिकमायंतितेषामध्वर्युः पूर्वोगच्छ
तितं गच्छंतं होता। अध्वर्यो वेरपाः ३ इति त्रिः पृच्छति। होतृप्रश्नानंतरं अध्वर्युः उतेम
न न्नमुरुतमाः पश्येयति त्रिः प्रत्याह प्रचरणी गतेनशेषेघातस्मिन्न विद्यमाने न्यं स्रुतुग्द
होतंगृहीत्वायमग्नेपश्नुमत्सं० शश्चतारिभ्यः स्वाहा। अग्नयइदं। ऋतुकरणसंज्ञकेसवहृ
तं जुहोति। पूर्वोध्वर्युर्हविर्धानं प्रविश्य दक्षिणस्य हविर्धानस्य अपरस्तुबुकदेशे प्र
चरणीसादयति अथ होतृचमसं वसतीवरीकुंभं मैत्रावरुणचमसं सोम्याः सवनी
याश्च उन्नेता मैत्रावरुणचमसाध्वर्युः एकधनिनश्च कुंभ्यादीनामाहर्तारो परेण
द्वारेण हविर्धानं प्रपादयंति अत्रैव यजमानाग्रे वक्ष्यमाणेन मार्गेण प्रविशति।
ततो ब्रह्मोल्कधनासु वसतीवरीभिः प्रपाद्यमानासु वै पूर्णद्वारेण हविर्धानं प्रवि
श्याग्रेण खरं परीत्य दक्षिणतउपविश्या ग्रहकालादास्ते ग्रहेषु गृह्यमाणेषु

७१ नाचंयच्छत्याग्रयणस्यग्रहणात् ॥ अध्वर्युःहोतृचमसमपरेण छंदोगान्दक्षिणेन
नीत्वादक्षिणस्यहविर्धानस्योत्तरस्यावर्तन्यामक्षस्यपुरस्तादीषत्स्पृष्टंचक्रेणसा
दयतिततोवसतीवरीः मैत्रावरुणचमसीयाअपरेण छंदोगानुत्तरेणनीत्वोत्तर
स्यहविर्धानस्यसमीपेयथावकाशं सादयतिएकधानानांतुपश्चादक्षमेवासा
दनं। ततोयजमानयस्मिन्नेवकाले सवनीयाअपोहविर्धानमध्वर्युः प्रपा
दयतितस्मिन्नेवकालेताअनुप्रविश्यापरेण छंदोगान्दक्षिणेनदक्षिणंशौ[illegible]
कं गत्वादक्षिणतोभिमुखवदेश! आस्तेअत्रतुयेनैवद्वारेणराज्ञःप्रतिपा
दनंतेनैवद्वारेणापामपिप्रतिपादनमित्यादिभाष्यकारोक्तंद्रष्टव्यंततो
ध्वर्युःनिग्राभ्याःस्थदेवश्रुतःशुक्रःशुक्रभृतःपृताःपृतभृतआयुर्मेतर्पयत्स्वा॰ ११९

गोभिर्णोममा विदत्स्वन्वः। इति होतृचमसः सर्वे यजमानं वाचयति तानि ग्राम्या भवंति
अथाध्वर्युः ग्रहप्रचारः। आग्रयणग्रहग्रहणपर्यंतं ये गृह्यंते ते चोपांशुग्राह्याः
आग्रयणादूर्ध्वमुपह्निमताम् ... दीर्घन्यूनेन स्वरेण ग्राह्याः तत्र दधिग्रहग्रहण
प्रचरति उपयामगृहीतोसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दिवे त्वान्तरिक्षाय त्वा
पृथिव्यै त्वा। इति दधिग्रहपात्रं पूर्वकृतस्य दध्नो दधिग्रहं गृह्णाति। अपैद्रद्वि
षतोमनो प्रजिज्यासन्तीयानितं जहि। इति दत्तं दधिग्रहं अग्रेण खरं दक्षिणेन ब्र
ह्म यजमानौ नीत्वाहवनीयं हरति। प्राणाय त्वा पानाय त्वा व्यानाय त्वा सते
ह्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि स्वाहा। प्रजापतये इदं। इति जुहोति।
सामग्रही व्यन्ना जानमादेत्त य ... तमेकग्रहाया त्वं मन्यते प्र सुपने ह्येते रंति

॥११२

दधाति। ग्रहार्थं गृहीतमुपरेन्त्युप्य वसतीवरीभ्यो न्यस्मिन्पात्रेभिषिच्यापरेण
छंदोगान्नीत्वा अंतरे सुमुविश्य न् राजानं वसतीवरीभिरुपसृज्य। अधीवधं
अवीवधं वो मनसा सुजा० सन नाय सोमं। इत्यभिमंत्र्य सकृदभिषुत्य तिस्त्रो।
त्यस्तस्य समिधः परिग्मन्देवा अकृण्वन्नुशिजो अमर्त्यवे। तास्वामेकामदधु
र्मर्त्ये भुजं लोकमिद्वूउपजामीनईयतुः इति येनकेनचिद्ग्राव्णा यथार्थं
मभिषुणोति। योभिषूयमाणस्यरान्तस्कुभ्मणो बहिः प्रथमांशुर्निष्क्रामति
तमास्कान्त्सरुअजर्या सहरायस्पोषेण। द्रियंमे जीर्येमा निर्वधीः इत्यभि
मंत्रयते प्रत्याहरति वा। ततउद्धृत्य। द्रप्सश्चस्कंद पृथिवीमनुद्या० सप्तहो
त्राः इति बहिः स्कंदितानभिमृश्यानुमंत्रयते। यदि स्कन्नाः स्युः सर्वेषाम[illegible] ॥११२

गा।गद्धर्वणांविप्रु ऽनुमंत्रणां।तः कर्तं ।। भवति। अभिषवमंत्रवर्जं ये नैव मार्गेणापाहृ
तः सोमः तेनैव पात्रं प्रवेश्य प्रत्याहृत्य स क्षिरण्येन पाणिना। उपयामगृ० पृथिव्यै
त्वा इति गृहीत्वा। अपेंद्रद्धि० तं जा।। इति ह्रति पूर्ववत् प्राणाय त्वा पा० जुहोमि
स्वाहेति जुहोति। प्रजापतय इदं०। पूर्ववद्दक्षिणार्धे पूर्वार्धे उत्तरार्धे पूर्वार्धे वा
हवनीये पूर्वे जुहोति। सर्वत्र वसती वरीयामुपरि राज्ञेश्च प्रपादने धाराग्रहे
णे सर्वत्र वा हवनीयं प्रति नयने अयमेव मार्गः यत्रैकमेव जुहोति दक्षिणार्धे
पूर्वार्धे वा तत्रैव सर्वत्र सोमाहुती जुहोति आज्य दधिग्रहयोः नास्ति देशनियमः
हुत्वात्र शेषं भक्षाय करोति इति सर्व सोमाभिषवाणकल्पः अन्येनाहृतसो
मे भक्षविधिरग्रे यथायोगं व्या० व्यास्यते। सोमग्रहभक्षः अग्रेण होतारम्

॥११२

त्यङ्गासीनः नचक्षसंत्वा० रव्यपामित्यवेक्ष्य। मंद्राभिभूतिरिति भक्षयति हिन्वँ त्वा म
त्वानमभिमृशति यस्तु पुरोत्स्य सादयति। अंशुना प्रन्नरतिराजानमपादायेत्या
दिविभु उनुमंत्रणं। तमुक्तेमव उप रेन्तु प्यवसतीवत्सामिरुपस्त ज्यअवीवृधव
इत्यादिना सोममभिमंत्र्य सकृदभिषुत्य आमास्का नितिप्रथमं स्वन्नमंशुम
भिमंत्र्यादायवाद्रप्सश्चस्कंदेति विप्रुषो नुमंत्र्य प्रा० णसापान्य प्राणानू क
यानष्चित्र आभुवदू० इत्यावृता। इतिवामदेव्यं साममनसा गायमानो वा
उपयामगृहीतोसीति गृह्णाति यद्यनवानं ग्रहीतुं न शक्नोति आनः प्रा
णएतु परावत आं० स्विप्राणाय त्वा। इति हिरण्यशतमानं गृह्णाति। तंश
तमानेन हिरण्येन संस्पृश्य हिरण्येनापिदधाति। इंद्राग्नीमवर्चः कृणुतां ॥११२

दधन्वेवायदीमनु वाश॰ क्र
व॰ धत्तमश्विना। इति यो क्तं हरति। तं तानवानं। दधन्वेवायदीमनु वाश॰ क्र
मिवाभवत्स्वाहा। प्रजापतय इदं। अद्भिः प्रतिप्रस्थाताध्वर्युं प्रक्षालयति। द्वाद
श धेनूः पष्ठौही वा गर्भिणीः कल्याधिवासं वा शो अध्वर्यो नेददामि। स ध्वर्यवे
यजमानो वरं ददाति। अध्वर्युः पूर्वेण द्वारेण सादिः सर्वे ग्रहाणां समानं पूर्वेण
द्वारेण सदः प्रविश्य याग्रेण होतारं पुरस्तात्प्रत्यङ्ङासीनः नृचक्षसं त्वा देव सो
म सुचक्षा अवख्येषमित्येवं रूपवाग्देवी सोमस्य तृप्यन्त्विति भक्षयति हिन्व
मगात्राहरिवा॰ मिसत्तिगा॰ इत्यात्मानं प्रत्यभिमृशति। मार्जालीये पात्रं प्रक्षा
ल्याय सेनसादयति। अदाभ्येन प्रचरति वसवस्त्वा प्रवृहन्तु गा॰ उपेहि। रु
द्रास्त्वा प्रवृहन्तु त्रै॰ उपेहि। आदित्यास्त्वा प्रवृहन्तु जा॰ उपेहि। इत्युपनह्य

।।११४

स्वराजास्त्रीनं भूतसंस्पष्टान्अरा।ता न्अ रह्या न्यस्मिन्निषिच्यलौंकिकस्य
दध्नोलिग्राह्या। णांवा वकदेशं दधिग्रह पात्रादन्यस्मिन्पात्रे निषिच्यमादा
सुते शुक्र शुक्रमा। धूनोमि मंदना। सुते शु॰ नो मिको तना सुतं शुक्र॰ मित
स्मिन्न तैरेतान रा न्त्रिः अदक्षिणमनुपरिप्लावयाति। शुक्रं ते शुक्रेण गच्छा
म्यक्रो रूप॰ रश्मिभिः। उपयामगृहीतासि। अग्निः प्रातः सवने पात्वस्मा
न्वै॰ भक्षाः स्याम। उपयामगृ॰ सि। विश्वे देवा मरुत इन्द्रो अस्मा॰ सुमतौ स्या
म। उपयामगृ॰ सि। इदं तृतीयं सवनं कवी॰ सीयोनयं तु। उपयामगृ॰ सि।
दधिग्रहपात्रे तैस्त्रिर्ग्रहं गृह्णामि। आस्मिन्नुग्रा अचुच्युवु॰ असश्च
ता इति हरति ककुहं रूपं वृषभस्य रोचते। इहत इत्यभिमंत्रयते सोमः सो। ।।११४

मस्यपरोगाः शु० यत्ते० सोमायस्वाहा । इति जुहोति । सोमायेदं । द्वादश धेनूः प
श्चौही वा गर्भिणीः कल्य धिवा संवा ध्वर्या नेद ताभि अभिषवाभावाद्दक्षिणाभावः
अध्वर्युः येन क्रमेण वद्धास्ते नैव क्रमेण अ तातानं शूनुनुसवन मभिषवार्थेन

४ दधाति । द्वितीयः पटलः देवस्य त्वा स० मादमो दे । उपांशुसवनं ग्रावाणमा
दाय वाचं यच्छत्याग्रयणस्य ग्रहणात् । उपांशु सवनाभावे पि वाग्यमनं स्यात्
ग्रावास्य ध्वरकृद्देवेभ्यो गंभीर० स्वंतं व छिन्ने । इत्यभिमंत्रयते । तमधिषवण
ऊर्ध्वे सानुं निधाय । इंद्रायत्वा वत्र घ्ने । इंद्राय त्वा वृत्रतुरे । इंद्रायत्वा भिमाति घ्ने ।
इंद्रायत्वा दित्यवते । इंद्रायत्वा विश्वदेव्या वते इति पञ्चभिर्मंत्रैरुपांशुसवनं ग्रा
वाणमभितस्यो परीति यावत् राजानमभिमिमीते । उपसमूहनं वर्जते नै

वक्रमेण तद्यथा सहिरण्येन पाणिनाल्पैकैकयां गुल्म्यस्तेनेन क्रमेण तैर्मंत्रैः पच
भिः पंचकृत्वो मिमीते तूष्णीं पंच कृत्वः अधिषवण स्यैक देशे राजानं न्युप्य याव
दकग्रहार्थं यां मन्यते तावं तमादाय प्रत्यु पनह्येतरा निदधाति ग्रहाया
प्तमुपरं न्युप्य वसता वरीभिरुपसृज्य श्चात्रा स्य वक्त्र तुरोराधोगू० कं सो
मः पिबतु इति हो तचमसस्ता भिर्निग्राह्याभिरद्भिरंतरेभ्यमुपसृजोति। यु
तस्मा मदिद्वि ज्योतिर्य० धिदास्त्र वाचेः इत्युपसृष्टं राजानमभिमंत्र
यते। उपसृष्टस्य राज्ञः षडंशून संस्पृष्टानकंकोडीन्ता प्रवृह्य प्रवृहण
क्रमेणाप्रता तान्निधाय तराना दाय उपरिष्टात्पाणे स्तं ग्रावाणं धारयन्
नेधरस्यां दृशहे। प्रागपागुदगधरा क्तो० बनिश्वर। होतचमसे त्रिः प्रद ॥११६

क्षिणमनुपरिप्लावयति। स निग्राभो भवति तानुप रेन्त्युपब्दसतीवरीभिरुप
सृज्य अवीवृधध्वो मनसा॰ नारसोमं। इत्यभिमंत्र्य मा भेर्मा संविक्था इति
ग्रावाणमुद्यम्य धिषणे वीडू सती वी॰ ग्रमामाहिंसिष्ट। इत्यधिषवण
फलके अभिमंत्र्य। अनाग संस्त्वा वयं मिंद्रेण॰ स्तेभ स्त्व॰ंशभूरहत सो
मो जोरा इति यन्त्रमूलं लोष्टं तृणं वाप स्यति तस्मिन्देशे समे प्रहरति यदि
तानि न स्युरं तर्हि तृणमंतर्धाय प्रहरति स कन्मंत्रमुक्तो प्रथमाभिषवो
द्वाभ्यां हस्ताभ्यां मुष्टो कृत्वो ग्रेभिषुत्य सति निमित्ते आमास्को॰ दप्सुश्चस्कं
द॰ इत्येतयोः कतयोः प्रागपागुदगिति निग्राभमुपैति अपातानामंशूनां द्वा
भ्यां प्रथमद्वितीयाभ्यां उपांशुपात्रमपि यायो तरतः इति प स्थातोपयद्य

११९६

ति। वाचस्पतये पवस्व वाजिं०ग भस्ति पूतः इति तस्मिन्नंजलिना ध्वर्युः सोमं मासिं
चति। एवं द्वितीयेन पर्यायेण भिषुणोति। तं उद्यावस्था ग्रास्य नृत्तं तु इति निग्रा
भ्याभिरुपस्थ ज्य यत्ते सोम दिवि ज्योतिरिति मिमंत्र्य उपरिष्टाद्ग्रावाणं धार
यित्वा प्रागपागुदगिति होतृचमसे त्रिः प्रदक्षिणमनु परिप्लाव्यतानुपर
न्यूष्यवसतीवरीभिरुपस्ते ज्य अवीरधा भिमन्त्र्य माभेर्मा संविक्था
इति ग्रावाणमुद्यम्य धिषणे वीडुसती इत्यधिषवण फलके अभिमंत्र्य अना
गसस्त्वा वयमिति तस्मिन्सोमे पूर्ववत्सहस्य एकादशकृत्वो द्वितीयमभि
षुणोति आमास्कान्द्रप्सश्च स्कन्देति कर्तायाः प्रागपागुदगिति निग्राभ
मुपेत्य पूर्वां वंशः अपोत्सृज्य सन्नितो ततो निधाय तत्तृतीयचतुर्थाभ्यामुपांशुपा ॥११९६॥

त्रमपिधायोत्तरतः प्रतिकृस्यातापयश्च इति देवो देवानां पवित्रमसि येषां भा
गोऽसि तेभ्यस्त्वेति तस्मिन्नं जालिना ध्वर्युः सोममासिंचति। एवं ततो यूपर्यो
येणाभिषुणोति। तद्यथाश्चात्रास्य वत्रे इति भिग्रा भ्यामिरुपसृज्ययत्ते सा
मदिविज्योतिरित्यभिमं अप्रागपामि। तं होतृचमसे त्रिः प्रदक्षिणमनुपरि
प्लाव्यतानुपरेन्युप्य वसतीवरीभिरुपसृज्यावीवृधामित्यभिमंत्र्यमाभेमासं
विक्था इति ग्रावाणमुद्यम्य धिषणे वीडू सती इत्यधिषवणफलके अभिमं
त्र्यानागसस्त्वा वयामिति तस्मिन्सोमपूर्वं प्रहृत्य द्वादशकृत्वस्तृतीयमभि
षुणोति। आमास्का ऽदृस्य श्च स्कंदेति। तयोः प्रागपागाति निग्राभमुपैति
द्वितीय पर्यायपिधानो अपोद्धृत्य भरी तो निधायान्याभ्यां पंचमपक्षा

म्यामुपांशुपात्रमपिधायोत्तरतः प्रतिप्रस्थातोपयच्छति। मधुमतीर्न इष
स्कृधि दिं॰भ्यः पार्थिवेभ्यः इति तास्मिन्नुपांशुपात्रे ध्वर्युः सोममासिंचति।
पंचमषष्ठौ प्रज्ञातौ निदधाति। स्वाकृतोसीत्युत्तिष्ठति। उर्वन्तरिक्षमन्वि
हीतिगच्छति। उत्तरेण होतारमतिक्रम्य दक्षिणेन पात्रं हुत्वा मनस्त्वाष्टु।
इत्युत्तरं परिधिसंधिमन्ववहृत्य स्वाहा। त्वा सुभवः सूर्याय स्वाहा। उर्ध्वे
स्तिष्ठन्दक्षिणाप्राचमृजुं दीर्घं संततं जुहोति। प्राणाय इदं देवेभ्यस्त्वा
मरीचिपेभ्यः इति मध्यमे परिधावभ्यंतरं लेपं निमार्ष्टि। देवेभ्यो मरीचि
पेभ्य इदं। अथैतं प्रत्येत्याग्रयणस्थाल्यां हुतशेषं धारासंपातमवनय
ति। एष ते योनिः प्राणाय त्वेति पात्रं सादयति। तस्मिन्नंशुमवदधाति सप

रिशेरत। आतनीयसवनात्। अंशुरितिरेकस्योननानाकांडः पार्श्योद्धस्त्व
तीयसवनपर्यान्तःविनाशो भ्रायश्चित्तं। कृत्वान्यो ग्राह्यः॥ ॥महाभिषवाय
पशुर्पविद्यात् पुरस्ता दध्वर्युः दक्षिणतःप्रतिप्रस्थाता पश्चान्नेष्टा उत्तरतउ
न्नेता अध्वर्युः [illegible] ग्रावाणमादत्ते याव्रत प्रातःसवनायाप्तिमन्यतेप्र
त्युपनह्य तर्रनिदधातितमुपरेन्यप्य वसतीवरीभिरुपसृज्य। उशिक्
त्वं देवसो। मगायते० यो अपीहि। यदाभ्या अंशावस्तेषामेकं प्रथममपि
सृजति। यत्ते सो मादाभ्यं नाम० मसोमाय स्वाहेति द्विः उपांशुपात्रनानां
हौत्रावनु सवनं निदधाति। वसतीवरीभिरुपसृज्य अवीरध्वं वो० सो
ममिन्त्याभिमन्त्र्य सर्वे दक्षिणैः पाणिभिर्ग्रावभिय थार्थमभिषुत्यामा

श्री:

११९८

स्कान्दस्यश्च स्कंदेत्येतयोः कृतयोः प्राग्यागुदग्र॰ ध्वरअध्वर्यु निग्राभमुपेति
एवं विहितो द्वितीयस्तृतीयश्चाभिषवः तद्यथावसतीवर्युपसर्जनादीदृधा
भिमंत्रणाद्धिषवणमास्कान्दस्कानुमंत्रणं प्रागपागीति निग्राभमापयम
नातानभिषवान्कृत्वा तृतीयायमेवेव वसतीवर्युपसर्जनादि निग्राभांतश्चा
भिषवः त्रिरभिषुत्य राजानं आधवनीये सिंचतिएवं विहितो द्वितीय
स्तृतीयश्च पर्यायः तद्यथावसतीवर्युपसर्जनादि निग्राभोपयमनां
तानभिषवांतेषु राजानमाधवनीये अभिषिंचतीति द्वितीयः पर्यायएवमे
व तृतीयः उत्तमेभिषवे सुसंभृतं राजानं कृत्वा पवित्रेण अपीड्य उपरेग्रा
वाः समुखान्कृत्वा तेष्वसजीषं व्यूहति सजीषमुखान्करोति प्रा ॥११९८

तिअधोधोक्षमुपकर्षेति। पवित्रंतवितत

चमुद्गातारोद्रोणकलशंग्रावस्वध्यूहंति। पवित्रमुद्गातारोधारयं

ब्रह्मणस्पतेप्रभुः। स्समाशतारितितस्मिन्नदीनदशं पवित्रमेगिपत्रयते। तस्ययजमानानामक

ति अध्वर्युः पवित्रेट इत्यनयेवचोपवित्रमेगिपत्रयते। तस्ययजमानानाम

रोति। मध्यमेदशधारास्रवणमागवतास्या दलं बिमूत्रमार्गेभिवकरोति। हो

त चमसेन चारिमन्संततांधारांस्रावयति यजमानएवआधवनायाउन्नेतो

दं चनेनविनिच्यअपरेणोद्गातारं नीत्वाहत्। तत्र चमसेआनयति स्रुवेत्या

धारयायाग्रहान्गृह्णाति। उपयामगृहीतोसि। तयच्छमघवन्पामेमघवन्ना

दयस्वाइत्यंतसोमंगृह्णाति। स्वांकृतासीत्य। तिचतुर्वेतरिक्षमन्विहीति

गच्छति। दक्षिणेनहोतारमतिक्रम्यवाल्यां। दुरति दक्षिणपारधिसधिमन्

त्रर्याय

वहत्स्यस्वाहा। ता सुभवः स्वाहा। इति प्रांच मुदंच न जुंचौ घिसंततं जुहोति। अपानोप
दं। नेपरिधौ लेपं निमोर्ष्टि नाग्रयणस्थाल्यां संपातमवनीयति। एषते यो निर
पानायत्वे त्यायतनेन पात्रं सादयति नां शुमवदधाति। उपांश्वंतर्यामपात्र अं ते
तरेण व्यानायत्वे त्सुपांशु सवनं ग्रावाणां संस्पृष्ट मुपांशु पात्रेण सादयति
तृतीयः पटलः रथंतरसाम्न्यै द्रवाग्रान्दक्षीयात्। आवायाभूष शुचिपा उप
नः स० पूर्वपेयं इति पुरोरुचमनुद्रुत्य ऐंद्रवायवपात्रमुपयच्छति धारासमी
पे। उपयामगृहीतो सिवायवे त्वा। इति तस्मिन्गृह्णाति पात्रमपयस्यापघि
घ इंद्रवायूइमे सुताः उप प्र० सुशं त्वा तिहि। इति पुरोरुचं पुनरेवोपयच्छति
धारासमीपे धारयति। उपयामगृहीतो सी इंद्रवायुभ्यां त्वेति तस्मिन्पुनर्गृ ॥११९

हीत्वा अव्यावृत्तपवित्रं अव्याप्टतं यत्पवित्रं दशापवित्रप्रदेशः तेन दशापवित्रे
ण ग्रहपात्रस्य बहिः पात्रपरिमृज्य एवते योनिः सजोषाभ्यां त्वेत्स्वायतने सा
दयति पुरस्तात् पदे यामा यजुषा गृह्यं ते उपरिष्टा पुयामा सन्चा सर्वग्रहणा
परिमार्जनं यथा योनि सादनं च। अयं वां मित्रावरुणा० श्रुतं रुत्व। इत्यनुद्रुत्य
पात्रमुपयच्छति। उपयाम० सि मित्रावरुणाभ्यां त्वा। तस्मिन् गृहीत्वा पात्रमपय
ष्या। रायावं स्थ सस्त्वा सोमदेम हव्येन देवा यवसेन गावः तां धेनुं मित्रावरुणा
युवं नो विश्वाहा धत्तमनपस्फुरंती। इति तं श्रुतेन पूर्वसंपादितं दोहेन पय
सा श्रित्वा। एष ते योनिर्ऋतायुभ्यां त्वेति सादयति। अयं वेनश्चोदयत्पृश्निग
र्भा इ० भीरहति। इत्यनुद्रुत्य शुक्रमुपयच्छति। उप० सि शंडाय त्वा इति गृह्णा

१२०

तिहिरण्येनश्रीत्वा एषते योनिर्वीरतां पाहि इत्यायतने सादयति। तं प्रलथा पूर्वे
पा॰ सुवर्धसेइत्यनु दुत्समधिपात्रमुपयच्छति। उप॰ सिमको ए ते तित स्मि न्ग
क्रातिमनो नयेत्सु रुवनेभु तिग्मं विपः शच्या वनुषो द्रवंता आम॰ः श र्मा भिरक्तु विन
म्णो अस्या श्रीणी तो दिबुं सगानकार्यः प्रमादा ज्ञात प्रायश्चित्तं न थोक्तं शास्त्रा
तरेना स्पष्टा रका ः सोमनेतराणि हवींषि र न्नि ति। दशा प वित्रेण परिमज्य एष
ते योनिः प्रजाः पाही त्यायतने सादयति ये देवा ॰ त्र्येकादश॰ मजुषधं उपया॰ सी
ति अथवोपयामगृहीतास्याग्रयणोसि स्वाग्रयणो॰ ही द्रियेण। इति गृह्णाति। पु
रस्तादुपयामेन यजुषाद्वाभ्यां धाराभ्यां गृह्णाति घ आग्रयण स्थाल्यां सोमस्तेस्य
कस्यश मन्यस्मिन्पात्रे संसिच्य द्वितीयां धरां करोति यां स्थाल्यां आग्रयणं गृहीतां हिमितित्रि

१२ ह्निं करोति शनैस्त्र ॥१२०

पवते सोमः पवते सोमः पवते इति त्रिराह शौनेरग्ने थौर्वैरथ
थौर्वैरथसूक्तैः सोमः पवते सोमः पवते सोमः पवते अस्मै सुन्वते यजमानाय पवत इषऊर्जे
सूक्तैः अस्मै ब्रह्मणे पवते अस्मै क्षत्राय पवते अस्मै सुन्वते यजमानाय पवते इषऊर्जे पवते सुभूताय
पवते अद्भ्य ओषधीभ्यः पवते वनस्पतिभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय
पवते अस्मै ब्रह्मवर्चसाय पवते यजमानाय पवते महां ज्येष्ठ्याय पवते। इति सामममि
मन्त्रयते। ...विर्भ्यो...य स्वा देवेभ्यः इत्यायतने साद
यदशापवित्रेण समुज्यमानेतयो। यानूर्ध्वां स्तानु पत्निमत इति श्रु
यति। अतऊर्ध्वमुपत्निमता स्वरेण ग्रहणं। यानूर्ध्वां स्ता नु पत्निमत इति श्रु
तेः अक्षिण्या ल्यानेक्षति। अग्न आयूंषि पवस इत्यनुद्रुत्याग्नय
पात्रे उपया०। स्यग्नये त्वा तेजस्वते। ...तेग्रही त्वा एष ते योनिरग्नये त्वा तेजस्व
ते इत्या... सादयति। उत्तिष्ठन्नोजसा सह० चमूषुतां इत्यैन्द्रपात्रमुपयच्छ,

ति॥ उपया॰ सीन्द्राय त्वौजस्वत इति गृहीत्वा निमृज्य एष ते योनिरिन्द्राय त्वौजस्वत इ
त्यायतने सादयति तरणिर्विश्वदर्शतो॰ रोचनं इत्यनुद्रुत्य सौर्य। उप॰ सिसू
र्याय त्वा भ्राजस्वत इति तस्मिन् गृहीत्वा निमृज्य एष ते योनिः सूर्याय त्वा भ्राजस्व
त इत्यायतने सादयति। मूर्धानं दिवो॰ न यंत देवाः उपयामगृहीतोस्यग्नये त्वा वै
श्वानराय ध्रुवो॰ ताक्षित्तमः। इति रत्नास्या ध्रुवं पूर्णं गृहीत्वा एष ते योनि र
ग्नये त्वा वैश्वानराय॰। इत्यायुष्काम स्य हिरण्य सादयति। ध्रुवं सादयित्वा रा
जानमुतिष्पावयति यावं तरातः सवनायास्तमन्यते विरमति धारा प्रपीड्य
पवित्रं निदधाति द्रोण कलशे च मणिवा मैत्रावरुण चमसीयाः सर्वाश्चै
कधनेकदेशा आधवनीये करनीय आधवनीयस्यैकदेश इतिरः पवित्रं पूतम

।

पवमानग्रहान्गृह्णातिउ
त्यवनयति। अतउर्ध्वं पूतभृति निरस्यास्तमवनीयते। उपया० सादयत्वा। इत्या
पया० सिमजापत यत्वा तिद्रोणकलशमभिमृशेत्। पूतभृतमभिमृशेत् निः सर्पतः स
धवनीयं। उप० सिविश्वेभ्यस्त्वा देवेभ्यः इति पूतभृतमभिमृशेत् निःसर्पतः स
मन्वारभन्ते ध्वर्युं प्रस्तोता प्रस्तोतारं प्रतिहर्ता प्रतिहर्तारमुद्गाता उद्गातारं ब्रह्मा
ब्राह्मणं यजमानो न्वारभते इति अध्वर्युरास्यनीयं कृत्तु करणं पात्रं तु गृहीत्वा
जुहोति। निरस्यन्यस्ते द्रप्सः स्कन्दति यस्ते अंशुर्ग्रावा० तं जुहोमि स्वाहा। इन्द्रायेदं। यो
द्रप्सो अंशुः पतितः पृ० होमिस्वाहा। इन्द्रायेदं। यस्ते द्रप्सो मधुमां इन्द्रि० हो
मिस्वाहा। इन्द्रायेदं। यस्ते द्रप्सः स्कन्दयति स्ते अंशुः स्वः परश्च यो दिवः परः
अयं देवो बृहस्पतिः सं तं सिञ्चतु राधसे स्वाहा। बृहस्पतये इदं। पुनर्गृहीत्वा।

१९२२

महाहविर्होता सत्स॰ नेनमः पृथिव्यैस्वा ॥ वानस्पत यइदं वै मुखात्स प्तहोतारं
चतुर्होदंचः प्रक्वाबहिष्पवमानंसर्प ते। आस्तावदेशं गच्छतीत्यर्थः अत्रब्र
ह्म यजमाना वपिसुरुतः गायत्रः पंशावसेवा देवता वकेण परिपरणपथा
स्वस्तिवसूनशीयदामं ग्रेगा अग्र ए॰ यजमान सर्वतिसेव प्रव्यवायेनान्वा
रब्धा एवगच्छंति अध्वर्युः पूर्वो बर्हिः पृथ्वी भिवदिव धून्वन् सर्पति दक्षिणेनना
लालभवेक्षमाणो वहिष्पवमानेनानुवर्तन तद्यथा वायुर्हिंकर्त्ताग्निः प्रस्तोता
प्रजापतिः सा॰ तः प्राणमयिदधातु। बर्हिर्मुष्टिं प्रयच्छन्स्तोत्रमुपाकरोति अ
ग्निमे । असर्ज्यैसर्जिवासर्ज्यैद्र र्घ। होसर्ज्यपावन्तधंम भिसर्पयजमाने
तिरदं बर्हिर्दानमेवस्तोत्रोपाकरणं सर्वान्पवमानानेवमेवोपाकरोति। पावंतध्व ॥१२॥

भिंतित्री नपीत्सर्थः पवमानत्रयव्यतिरिक्तानारणिस्तोत्राण्याज्यानितान्याग्निष्टो
मादीनिच। बर्हिष्यामितराणि स्तोत्राणि। र[illegible]यमानं बहिष्पवमानं ब्राह्मणाः सम
भिसर्पंति हूर्व्य चपरिब्याधंते यजमानः पत्न्यस्य हिंकुरुतस्य प्रस्तुहितस्य मे
वरुध्ये। भूर्भुवः सुवः चित्तिः स्रुक्‌ चि० सामाध्वर्युः इतिजपति। ब्रह्मा। ब्रह्मन्स्तो
ष्यामीत्युच्यमाने। देव सवितरेतत्ते प्राह तत्प्रच सुव० स्तुतदेवस्य सवितुः
प्र सवे रश्मिरसि क्षयाय त्वा क्षयं जिन्व। ओं स्तुत। इति प्रसौति। सर्व स्तोत्रा
णामेष कल्पः रश्मिरसि क्षयाय त्वा क्षयं जिन्वेति स्तोत्रे स्तोत्र उत्तरमुत्तरं स्तो
ममागानादधाति यजमानः श्येनोसि गायत्रछंदा अनु० संपारय। इतिम
ध्यमायां स्तोत्रियायामुपाकरणद्रव्यं न्यारभेत। स्तुतस्य स्तुतमस्यूर्जंम

१२२

स्तुतस्य स्तुतं गम्यादिंद्रियावंतो वनाभेद्धुक्षी० सोमेस० इस्म० यज्ञोब० तयोरश्मीणां। इतिस्तोत्रे समाप्ते नुमं त्रयते। स्तुते बहिष्पवमाने ब्रह्म यजमानो यथेतं प्रत्येत्य यथायतनमुपविशतः सवनीयस्य वपा होमात् चतुर्थः पटलः अध्वर्युः अग्नी दग्नीन्विहर बर्हिस्स्तृणाहि पुरोडाशांऽअलंकुरु प्रतिप्रस्थातः पशुमेहि इतिस्तुते बहिष्पवमाने उत्तिष्ठन्संप्रेष्यति हविर्धाने प्रविश्य विलोलन्नो अंतमः श० इते आक्षितं। इत्यैंद्रवायवादिदशग्रहानुपतिष्ठते। पुनर्विलोलन इत्युक्तौ सोमपात्राणि संमृशति रिक्तान्यपातिकेचित् आग्नीध्रीयाद् आग्नी ध्रोग्नारानी हत्स प्रत्सग्रभ्य स्वः वह्निरसि हव्यवाहनो इति होत्रीये रौद्रेणानीकेनेति सर्वत्र पुनरंगारानादायोत्तरायूपे माहव

॥१२२

नासंचारुत्सदक्षिणनागत्सरदः प्रविश्य श्वात्रासि प्रचेता रौद्रेणानीकेत्वा
नै (दिमो) त्रावरुणस्य पथेत प्रत्येत्यागारानादाया दायोत्तरतः सदः प्रविश्य
ब्राह्मणाछंस्यादीश्चतुरा विहरति। तुथासीति ब्राह्मणाछंसिनः उशिगसी
ति पोतुः अंधारिरसीति नेष्टुः अवस्युरसीत्यच्छावाकस्य प्रशास्त्रमार्गेण
शुध्यूरसीति माजालीयं अध्वर्युः कस्मिंश्चिज्ञमसे द्रोणकलशात्सरि पूर्वया
न्तुः राजानं गृहीत्वा प्रचरण्यां अपूर्वोज्यात्से चगृहीतं गृहीत्वा पुरस्तात्प्रस
शानः सोमनाहवनीयादीश्चतुरो व्याघारयति सम्राडसि कृशानू रौद्रेणा०
हिं ऽसीः इत्याहवनीयं व्याघार्य सम्राजे धिष्ण्याचेदं अन्यत्र विभूरो दिगुण
विशिष्टा धिष्ण्या देवताः विभूरसि प्रवाहणो रौ० । हिं ऽसीरित्याग्नीध्रीयं।

॥१२८॥

वाग्निरसि हव्यवाहनो रो० सीरिति होत्रीयं व्याघार्य अथाज्येन श्वात्रोसि प्रचे-
तारो० सीरिति प्रशास्त्रीयं। तुथोसीति ब्राह्मणाच्छासिनं। उशिगसीति पोत्री-
यं। अंघारिरसीति नेष्ट्रीयं। अवस्युरसीत्यच्छावाकीयं। अथ समन शुंध्यु-
रसीति मार्जालीयं अथ वाग्नीध्रीयं धाहुवनीयांतं वा क्रमेण व्याघारयति। धि-
ष्ण्यदेशात् किंचिदपसृत्य वषट्करोति अग्रेण होतारं पुरस्तात्प्रत्यङ्मासी-
नः। नृचक्षसं त्वा देव सोम सुचक्षा अवख्येषमित्यवेक्ष्य प्रतिप्रस्थातृहस्तकृयस्य। मंद्राभि-
भूतिः० वाग्देवी सोमस्य तृप्यतु इति वा भक्षयति। हिन्वेम रत्या दिना पूर्वोक्त-
मार्गेण भक्षयति। संततमनुष्टुप्स्ता बर्हिः स्तीर्णं अग्नेः कर्मणो वा० यज्ञस्य सं-
पुरोडाशानलंकरोति। देवो वः सविता मध्वानक्तु। देवस्त्वा सविता मध्वानक्तु

॥१२८॥

२८

र्थनमपाद्योपाकरणदेशमानयति अध्व
ति त्रिः प्रतिप्रस्थाता पञ्चाँशुस्नपयित्वा तीर्थनमपाद्योपाकरणदेशमानयति । द्रोणकलशादुप
र्युः यावांकशाम धु० मिक्षतं उपयां स्य भि भ्यां लां परिप्लुवयाद्रोणकलशादुप
सौर्यपूतभृत उनीयद्रोणकलशादभिघारयति । दशापवित्रेण संमृज्य एष ते
योनिर्मो ध्वीभ्यां सत्वायतने सादयति । सर्वग्रहणामेष के स्यः तं सादयित्वा । दे
वस्यत्वा स० भ्यामाददे । इति त्रिवृतां रशनामादाय पूर्वो मग्नी योमीयुरशनामनु
क्षिप्य गृहीतस्यार रशनया नाभिदघ्ने परिव्ययति ये । यूपायपरिवीयमाणायानु
ब्रूहीति संप्रेष्यति । परिवी रसि परित्वा दे० नाम नुष्याः इति परिव्ययति । अंतरि
क्षस्य त्वा सानावकगृहामी तिस्वरुमवगूहति यूपमुस्त्ज पसे लेतिद्विः बर्हिषी
आदायो पवीरसीति शाखा अग्नये त्वा जुष्टमुपाकरोम्युपो देवानित्याद्यावपा

१२८

होमांतं निरूढवत प्रजाते: पश्रमं यज्ञं पशुपत इत्यादि प्रजापतयेऽरदिपं चहो
त्रुति अग्नेर्जनित्रमसी त्यादि वेदेन धाय सामि धेनीभ्य: संप्रेष्यति प्रया
जादि वपा होमांतं मधिकार अग्नये छागस्य वपाया मेदसो नु ब्रूहि आश्र
वया स्तु श्रौषट् पंच प्रशुप्र कृति लेन संप्रेष्यति अग्नी षोमी यपक्षेत् अ
ग्नये छागस्य वपाया मेद सः प्रेष्य जातवेदो वपया० तु देगः स्वाहा यजमा०
ना भिहत्य सर्वे साखो ले मार्जयंते हुता यां वपायां। प्रस स्थ्यतोग्र हावकोशे रूप स्व
प्य प्रसे पंति। अध्वर्युः प्रति प्रस्थोतो नेतो ब्रह्मा यजमान श्चो पतिष्ठंते हो स
मुद्रो वितता वजूं० नो तिर्यत्यन्यं इति सदे वद्रोण कलशा धवनी यावुपंति

ष्टते। [illegible]सरी सतती वस्व० अनुहायजोर्ये इति पूतभृतमुप तिष्ठं ते। परिभूरग्निं
परिभूरिंद्रं परिभूर्विं० यतास्य तद्दरुन्मजे इति सकृत्सर्वे सोममुपतिष्ठते। प्रा
णायेमवर्चो दाव र्चेसे प वस्व इत्युपांशुपात्रं। अपानायमेव० स्वेत्यंतर्यामं। व्याना
यमेव० वर्स्वेत्युपांशुसवनं ग्रावाणं। वाचमेव र्चो० वस्वेत्यैंद्रवायवं। दक्षक्रतुभ्यां
मेव र्चोदा मे० वस्वेति मैत्रावरुणं। चक्षुर्भ्यां मे वर्चोदौ वर्चसे पथायेमिति शुक्रामं
थिनो। श्रोत्रायमेव० वस्वेत्याश्विनं। आत्मने मेव। वस्वेत्याग्रयणं। अंगेभ्यो
मेव० वस्वेत्युक्थ्यं। आयुषे मेव र्चो० स्वेति ध्रुवं। वीर्यायमेव र्चो० स्व। अतिग्रा
ह्यां स्विराद्वे त्सा प्रत्येकं। विष्णो जठरमसि वर्चो० वस्वेति द्रोण कलशं। इंद्रस्य
जठरमसि वर्चो० वस्वेत्या धवनीयं। विश्वेषां देवानां जठरमसि वर्चो० वस्वे

॥१२८

तिपूलभ्रतां। वर्चोदामेवर्च्चसेपवस्वेतिसर्वत्र नुप्रजातां। कौसिकोनामकरैभेता।
कायत्वायं ०श्रीयतस्यत इदमुन्मृजे। इत्य[illegible] शेषेण सर्वराजानां। स्पमुःस्वस्ति
र्विघनःस्वस्तिःप०शुर्नःस्वस्तिः इतिप्रत्य[illegible]स्वस्त्यनैः स्पयचिघनपशुपरभू
नुपतिष्ठंते। यज्ञियायस्तकृतस्यतेमा[illegible]न्यस्त्रा उपह्वयध्वं। इतिसर्वाणिस्फ्या
दीनिसहोपतिष्ठते। उपमाद्यावाप्टथिवी[illegible]यतां। द्यावाष्टथिव्यौ। उपास्तावा
ह्वयतां। इतियत्रवाहिष्प्रवमानेनस्तुवंते[illegible]देशे। उपकलश[illegible]ह्वयतां। द्रोण
कलशं। उपसोमाह्वयतां। इतिसर्वे[illegible]उपा[illegible]ग्नि ह्वयतां। इत्यग्निं। उपदे
वाह्वयतां। इतिदेवाः सर्वांस्त्रयस्त्रिंशा[illegible]नप्रकृताश्चग्रहदेवताः। उपय
तोह्वयतां। इतियत्तसादनानिसर्वाणिराज्यानि। उपमाहोत्रा उपहवेह्वयतां। इ ॥१२८

तिहोत्रकानुपतिष्ठंते।नमाग्नये मखघ्ने मखस्यमायशो यौत् इत्याहवनीयं।नमो
रुद्रायमखघ्नेनमस्कृत्यामापाहि।इत्याग्नीध्रीयमुपस्थायापउपस्पृश्य।न
मइंद्रायमखघ्नइंद्रियं मेवीर्यंमानिर्वधीः इति होत्रीयं।नमोयमाय मखघ्ने मखस्य
मायशो यौत्।इति मार्जालीयं।दृष्टेस्थः।धिष्णियेसमीचीमा हसस्पात।इत्यधि
पवणफलके।सूर्योमादेवो दिव्या हसस्पातु।सूर्यो।वायुरंतरिक्षात्पातु।
इतिवायुं।अग्निः पृथिव्याः पातु।अग्निं।यमः पितृभ्यः पातु।यमं।सरस्व
तीमनुष्येभ्यः पातु।सरस्वती।देवीद्वारौ मामासंताप्तं।इति सदोद्वारे।नमः
सदसे।इतिसदः नमः सदसस्पतये।इतिसदस्यं ब्रह्माणं वा।नमः सखीनां
पुरोगाणांचक्षुषे।इत्यृत्विजः।नमो दिवे।इतिदिवं।नमः पृथिव्यै।इतिपृथि

वीमुपतिष्ठंते। अध्वर्युः पूर्वेण द्वारेण सदः प्रविश्याप उपस्पृश्य। अहे दैधिष
व्यादत० त्याकर्तरः। यत्रैनि षण्णस्य भवतिततः स्वासनात्तृणं लोष्ठंवा निरस्य
१२३ उन्निवत उदुद्धतश्च० वीअद्याहः। इत्युपविशति प्राङ्मुखः। ततोत्र हि यजमा
नो पूर्वद्वारेण सदः प्रविश्याग्रेण प्रशास्त्रीयं धिष्ण्यं परीत्य दक्षिणेनाधिष्ण्यं
उपविशतः। अहे दै० उन्निव० एवं दक्षिणेनौदुंबरी सदस्यः एवं सदः प्रसर्प्य
उपवेशनानंतरं प्राचीनावीती आयांत पितरः पितमा० यूयं भूयास्त। इतिद
क्षिणार्धस्थान्पितॄनुपतिष्ठंते। यज्ञोपवीत्यप उपस्पृशेत्। ततः पशुतंत्रं
प्रपद्यते शामितः पशुं विशाधिगुदमानिक्षेः षीः धाष्टिमादाग्मातरिश्व
नो० भृगूणामंगिरसो० द्यौदेवस्येति मंत्राः श्रप्यमाणः सर्वाणि सवनानि

परिश्रेरतेतृतीयसवनेवा श्रप्यते। ब्रह्मयजमानावुपनिष्क्रम्यापरेणोत्तर
वेदिमतिक्रम्य दक्षिणतउपविशतः। प्रतिप्रस्थाताहृतान्पुरोडाशधानादी
न्ध्रुवपुरासादयति प्रियेण नाम्ना० आसीदंत्विति। ततस्स्रुची दक्षिणस्या
श्रोण्यावर्हिष्व्यूह्य सादयति। ततस्स्रुचीमेवोल्केखाजिनमासादयतिाम
जमा० यस्त आलौत्यासाद्यमानामामिक्षां। यो। म्नः कनीयइह० अपतामिंद्रो
हरिस्वान्भुवनान्नुदताम० यधानाअभिमृशति। योनः कनीय० अपतामिंद्रः
पूषण्वान्भुवनान्नुदताम०य। इतिकरंभं। यज्ञोसीतिपरिवापं। योनःकनी
यं० अपतामिंद्रो भुवनान्नुदतान्हं०य। इतिपुरोडाशं। इयमिंद्रियममृतंवी
यं ननयंद्रायप० तयादेवा अ० नेयमामिक्षामधिश्रयतां। इत्यामिक्षां। यस्

श्रीः

॥१२८

धवीमचरस्म्० न्मेदं द्रंवाजिनं मां धिनोतु इतिवाजिनं। अयंयज्ञ० पंचहोत्रा च
आसंनान्निहविः ष्यभिमृशति। ततोध्वर्युर्जु देपभृतो रुपस्तीर्य। मांमेमांशु संक्षि
जिध्वं मावो हिंसिषं माव स्तेजो पक्रमीतः भरतसु दुरेतमनु षिंचता वदाना
निवः प्रस्रव दास्यामिनमो वो अस्तु मा मा हिंसिष्ट। धाना अभिमंत्र्य द्विरव
दायपरिवापकरंभपुरोडाशामिक्षां तान्माः मेरिति प्रत्येकमभिमृश्य हितो
रवद्यति यदवदाना निवो वद्य० नतद्व आप्यायतां पुनः धानाः प्रत्यभिघार्य। पूर्व
वद्दितरानभिघार्य सर्वेभ्य उत्तरार्धेभ्य उपभृति स्विष्टकृत सकृत्सकृदवद्यति।
सकृज्जुह्वां द्विरुपभृत्यभिघार्य। प्रातः प्रातः सावस्येंद्राय पुरोडाशानामनुब्रू
हि। इति संप्रेष्यति। अत्याक्रम्याश्राव्य प्रत्याश्राव्य प्रातः प्रातः सावस्येंद्राय ॥१२८

पुरोडाशान् आस्यता अष्ट्येति संप्रेष्यति। वषट्कृते जुहोति। यजमानः इंद्रायेदं।
इंद्रस्याहं देवयज्ययेंद्रियाव्यन्नादो। इंद्रियाव्यन्नादोन्नाद इंद्रियाव्यन्नाद इंद्रि
यावी भूयासं प्राणैः सायुज्यं गमेयं। अॅगभक्षं तजह्वां पर्यस्याग्नेयनुब्रूहि आ
श्राव्य प्रेत्य आश्राव्याग्नेयं प्रेष्येति वषट्कृते जुहोति। अग्नयइदं। अग्नेरहं॰ याय
ष्मान्यज्ञेन प्रतिष्ठां॰ अग्निर्मा दुरिष्टात्॰ अध्वर्युः वैश्वानरे इत्युदकं निनीय
परिवापं विरुज्यान्यान्य विरुज्य प्राशित्रमवद्यति नेडां वा समवद्यति। ब्रह्मा मित्र
स्य त्वा॰ प्रक्षे। आज्यादीनि सर्वाणि हवींष्याच्छाद्य गोपायं कल्पयित्वा आज्य
लिप्तौ पाणी प्रक्षाल्य सौमिकं कर्म कृत्वा पद्यत ब्रह्मा यजमानौ यथेतं प्रत्य
त्य सदः प्रविश्योपविशतः अध्वर्युप्रतिप्रस्थातारौ हविर्दवत्येः न चरतः

उपयामगृहीतोसि वायव इंद्रवायुभ्यां त्वा। इति प्रतिप्रस्थातादित्यपात्रे ऐंद्र
॥१२८॥ वायवस्यैकदेशं गृह्णाति। उपयामगृहीतोसि वाक्षसदसि वा स्पा० ध्य
स्या गृह्णामि। इति तत्रैव द्वितीयं द्रोणकलशाद् गृह्णाति। अध्वर्यु रैंद्रवा
यवमादत्ते द्रोणकलशात्परिप्लवया राजानं परिगृह्योभौ हविर्धानादुप
निष्क्रम्य अध्वर्युः अध्वरोय त्वा यमस्तु देवाओ० घृतवद्देवसोमस्वाहा इ
त्याधारयति। परिप्लवया सोमपीथो शृतो भवति। ओषधीभ्यः पशवे
जनाय विश्वस्मै भूताय देवा सोमाय इदं मोमेति भाष्यकारः अपरेणाग्निं दक्षि
णतो ध्वर्युरुत्तरतः प्रतिप्रस्थाता चातिष्ठतः अध्वर्युः वायव इंद्रवायुभ्या
मनुब्रूहि आश्रावयास्तु श्रौषट् वायव इंद्रवायुभ्यां प्रेष्येति। यजमानो हूय ॥१२८॥

मानोऍद्रवायवेभूरसिश्रेष्ठोरश्मीनांप्राणपाः प्राणंमेपाहि। इत्यादित्यमुपति
ष्ठते। उभौवषट्कृतेजुहुतः पुनर्वषट्कृतेजुहुतः वायवइंद्रवायुभ्यामिदं। अध्व
र्यो:पा। त्रेप्रतिप्रस्थातासंपातमवनयति। अध्वर्युः प्रतिप्रस्थातुःपात्रेएकदेशं

य

संपातस्यावनयति। अध्वर्युःसदोगच्छति। प्रतिप्रस्थाताहविर्धानंप्रविश्य
देवेभ्यस्त्वेत्यादित्यस्थाल्यां संपातमवनयति। विष्णुउरुक्रमैषतेसोमस्तं
रक्षस्वतेदुश्चक्षामावख्यदित्यादित्यपात्रेणादित्यस्थालीमपिदधाति।
अध्वर्युःप्रथिवरुःपुरोवसुर्वाक्पावाचंमेपाहीतिसोत्रेभक्षंप्रयच्छति। ते
नैवहोताप्रतिगृह्णाति। परिप्लवाशेषंभक्षायाध्वर्युरेकत्रपात्रस्थापयति
अथमैत्रावरुणग्रहेणप्रचरतः। प्रतिप्रस्थातादित्यपात्रे। उपयामगृही

॥१२०

तोऽस्यत सदसि चक्षु० गृह्णामि। इति मैत्रावरुण ग्रहादेशं। देवं गृह्णाति नद्रो
णकलशात्। अध्वर्युर्मैत्रावरुणमादत्ते उभौ हविर्धाने नाग्नि क्रम्यापरेणाग्निं दक्षि
णतोऽध्वर्युरुत्तरतः प्रतिप्रस्थाता चतिष्ठतः अध्वर्युः मित्रावरुणाभ्यामनुब्रू
हीति सं प्रेष्य आश्रावयास्तु श्रौषट् मित्रावरुणाभ्यां प्रेष्य उभावप्येतेस
कृज्जुहुतः मित्रावरुणाभ्यामिदं यजमान० धूरसि श्रेष्ठो रश्मीनाम प्राण० पा
हि। प्रतिप्रस्थाता ध्वर्योः पात्रे संपातमवनयति। अध्वर्युस्तस्यैकदेशं प्रतिप्र
स्थातुः पात्रे वनीय सदो गच्छति। प्रतिप्रस्थाता हविर्धाने प्रविश्य विश्वेदेवेभ्यस्त्वे
त्यादित्यस्थाल्यां संपातमवनीय विष्णुरुरुक्रमं इति तेन पात्रेणादित्यस्थाली
मपिदधाति। अध्वर्युः मयि वसु० इदं तु श्वः सुष्या। श्वः सुमे पात्री तिहोत्रे

॥१२०

भक्षं प्रयच्छति तेनैव होता प्रतिगृह्णाति ततः आश्विनेन प्रचरतः। प्रतिप्रस्थाता।
उपयामगृहीतोऽसि श्रुतसदसि श्रोत्रपा० श्रोत्रं गृह्णामि। आश्विनेकदेशं खुरस्य
पात्रं गृह्णाति। न द्रोणकलशात्। उभौ निष्क्रम्य पूर्ववदपरेणाग्निं तिष्ठतः। अध्व
र्यु: अश्विभ्यामनुब्रूहि आश्रावय अस्तु श्रौषट् अश्विभ्यां प्रेष्य उभौ सकृद्धूय
हुतेजुहुतः। आश्विभ्यामिदं। प्रतिप्रस्थाताध्वर्युपात्रे संपातमवनयति। अध्व
र्युः प्रतिप्रस्थातृपात्रएकदेशमवनीय सदः प्रविशति। प्रतिप्रस्थाता हविर्धा
ने प्रविश्य विश्वेभ्यस्त्वा देवेभ्य इति स्थाल्यां संपातमवनीय धिष्ण्ये रुक्म इति
तेन पात्रेण स्थालीमपिदधाति। अध्वर्युः मयि वसुः संयद्वसुः श्रोत्रपाः श्रो
त्रं मे पाहीति होत्रे भक्षं प्रयच्छति। तेनैव स प्रतिगृह्णाति। अथ यद्दिउच्छेपान

॥१२१

र्यतिताहृयदिसोम उपदस्येदितिविधानेनोत्पत्तिःकार्या। अध्वर्युः आधवनी
यं पूतभृत्सु ननीयआधवनीयं दशाभिर्मृष्ट्वा न्युब्जतिअपीऋ पवित्रंनिद
धाति। तांहोब्रह्मा! द्राता यजमानः सदस्यश्चेमध्यसंःकारिणःमैत्रावरु
णाब्राह्मणाछं सीपोतानेष्टा छावाक् आग्नीध्रश्चहोत्रका उभयेचमसैनो
भवंतिसर्वेषांप्रतिपुरुषंचमसाध्वर्यवः। अध्वर्युः। उन्नीयमानेभ्योनुब्रू
हिहोतुश्चमसमनुन्नयध्वसुभयतः शुक्रान्कुरुध्वम छावाकस्यचमसो
ध्वर्यो माव्यसुन्नेषाः प्रतिप्रस्थातः प्रोक्षिताप्रोक्षितांछ्कला न्कल्पयान्ने
तः सोमंप्रभावयेतिसंप्रेष्यति। खरएवहोतृचमसमुख्यान्दशचमसानु
न्नयंत्यन्यानघ्छावाकचमसान्परिप्लवया न्नेता द्रोणकलशासुपस्तीर्य

॥१२१

पूतमृतउन्नीयद्रोणकलशादभिघारयति। सर्वेचमसानामयंकल्पः प्राकृस्थि
तेष्वेवोन्नीयमानमुक्तं। तस्मिन्परिहिते। देवस्यत्वास० भ्यामाददे। इत्यध्वर्युः
शुक्रग्रहमादत्ते तेनैवमंथिनंप्रतिप्रस्थाता। ८। छ्रीचमसांश्चमसाध्वर्युआद
दते। तूष्णीं संस्कृताभिरद्भिः आक्षिताभ्यांशकलाभ्यांशुक्रामंथिनौ अध्वर्युप्रति [illegible]
प्रस्थातारौ अपिधत्तः अपनुत्तः शण्डः सहमुपाभ्मना अप [illegible]
[illegible] अपनुत्तो मर्कः सहमुपाभ्मनेति आक्षिताभ्यांशकलाभ्यामधस्तात्सां
सृनपध्वंसयतः ताभ्यामेव शकलाभ्यामुपयघ्नतः। अध्वर्युः स्रुचौ स्रज
नधादेवास्त्वा शुक्रपाः प्रणयंतु इति शुक्रंहरति। प्रतिप्रस्थाता। स्रुतौ स्रज
नधादेवास्त्वा मंथिपाः प्रणयंतु इति मंथिनंहरति। उर्वंतरिक्षमन्विहीतिग

१२८
न

घृतः अनपृष्ठ अंचमसाध्वर्यवः प्रांचोनुपूर्वं तिष्ठंति। तान्दक्षिणेनाध्वर्युर्हरति
उत्तरेण प्रतिप्रस्थाता सर्वे निष्क्रामंति। अग्रेण हविर्धानेऽरत्निपात्रे वा उभौ
आयुः स्वं धत्तं तं मे जिन्वतं प्रा॰ तं॰ मपा॰ तं॰ व्या॰ तं॰ च॰ तं॰ श्रो॰ तं॰ मन॰ तं॰ वा॰ तं॰
लमिति संधत्तः अध्वर्युर्दक्षिणेन ग्र॰ त्युत्तरेण प्रतिप्रस्थाता। अपरेण च
मसाध्वर्यवस्तिष्ठंति उभौ अनाधृष्टासीति गुल्फाभ्यामुत्तरवेदिं विलिख्यतो वि
परिक्रामतः अध्वर्युः सुवीराः प्रजाः प्र॰ हि शुक्रः शुक्रशोचिषा। इति दक्षिणे
न हरति। प्रतिप्रस्थाता। सुप्रजाः प्रजाः प्र॰ री हि मंथी मंथिशोचिषा इति उत्त
रेण हरति। यजमानः ग्रैहाजिन्वेथा॰ सुपथ्याम ध्वावीतात् इत्यनुमंत्रयते।
उभौ अग्रेणाहवनीयमभितो यूपं पुरस्तात् संचावतिष्ठेते पश्चात् सोच्छ्र

भा॰ २

मरामध्वर्यवः अध्वर्युः संजग्मानौ दिव आ पृथिव्याः शुक्रः शुक्रशोचिषेति प्रतिप्र
स्थाता संजग्मानौ दिव आ पृथिव्या मंथी मंथिशोचिषेति उभौ अरत्नी पात्रे वा
संधत्तः उभौ आयुः स्थ आयुर्मे धत्तमायुर्यज्ञाय धत्तम् आ० आ० चे० श्रो० तो० ‌पुन
जामयित्वैव यजमाने च इत्युभौ ग्रहावभिमंत्रयते। अध्वर्युः शुक्रस्याधिष्ठा
नमसि शुक्रबाते समिध्यस्व स्वाहा। प्रतिप्रस्थाता। मंथिनो धिष्ठानमसि
मंथिन्नेवा तेसमित्तया समिध्यस्व स्वाहा। उभौ स्व प्रोक्षितौ शकलौ अभ्या
धत्तः शुक्रामंथिभ्यामिदं। निरस्तः शंडः सहमाघ्मना निरस्तो मर्कः सह
पाप्मना इत्युप्रोक्षितौ शकलौ बहिर्वेदि निरस्येता पउपस्पृश्य। अध्वर्युरा
श्राव्य प्रत्याश्राव्य प्रातः प्रातः सावस्य शुक्रवतो मंथिवतो मधुश्चुत इ

१२२

द्रम्य सोमान्। स्थिता प्रेष्य। मध्यतःकारिणां चमसाध्वर्यवो वषट्कृता[illegible]नुवषट्
तानुजुहुत होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वा। शुक्रास्या सुन्नीयोपा
वर्तेध्वमिति संप्रेष्यति। आच्छिन्नस्यतो रथ्यिपते सुवीर्यस्य रायस्पोषस्य जीवसे।
शुक्रं हूयमानमन्वारभते। वषट्कृते सर्वे युगपज्जुहृति। स प्रथमः संकृति
विभ्र० इन्द्राय सुतमाजुहोमि स्वाहेत्यध्वर्युः प्रतिप्रस्थाता। स प्रथमः सं० रसे
मित्राय सुतमाजुहोमि स्वाहेति। इन्द्रायेदं मित्रायेदं। प्रतिप्रस्थाता उत्तरतः पु
रस्ताद्बर्हिः परिध्यन्तर्वेदि आहवनीयादङ्गारान्निरूह्य तस्मिन्। रथ्यपते रुद्रभा
गोयत्निरया चथास्तं जुषस्व विदे० णा रं स्वस्ति रं स्वाहा। इत्यैतस्मिथिनः सं
स्रावं सर्वहुतं जुहोति। रुद्राय वास्तुपतय इदं। मध्यतःकारिणां चमसाध्व

त्वध्वर्युः। प्रति प्र० स प्रथमः सं० तस्मै मित्राय सुतमाजुहोमि स्वाहेति जुहोति। ॥१२२॥

रसःप्रभृ
त्येवानुवषट्कृतंजुहोति। अग्नेयस्विष्टकृतेइदं। अध्वर्युःप्रैतुहोतुश्चमसःप्रभृ
णः। श्रोत्राद्धनुः प्रयजमानस्यप्रसदस्यस्योति। संप्रेष्यति। अध्वर्युर्प्रतिप्रस्थातारो
यथेतंप्रेत्यअध्वर्युःसूदवच्छुक्रपात्रमायतनेसादयति। प्रतिप्रस्थाता। अस्नू
दमेवमंथिपात्रमायतनेसादयति। मुध्यःतःकारिणांचमसान्सदोहरति। हो
त्रकाणांचमसाध्वर्यवःहविर्धानंप्रविश्यशुक्रोद्रोणकलशास्थःसोमस्तस्यो
पस्तरणोन्नयनाभिघारणानिस्वस्वचमसेकुर्वीति। एवंस्वंस्वंचमसमुन्नीया
हवनीयमुपावर्त्तते। अध्वर्युःतःप्रचरति। मैत्रावरुणचमसमादायाश्राव्य
प्रत्याश्राव्यप्रशास्तर्यजेतिसंप्रेष्यति। वषट्कृतानुवषट्कृतयोःहुत्वान्त
मसाध्वर्यवेप्रयच्छति। मित्रावरुणाभ्यांमिदं। अग्नयेस्विष्टकृतइदं। चमसा

॥१२४ ध्वर्युः सदो भक्षं हरति। चमसा गणयोऽयः ग्रा स्सदः प्रविष्टस्तेनैतेन तस्मै चम
समाहरति। तेनैव प्रत्यक् समत्याहरति। अध्वर्युरेव मुत्तरः प्रचरति आश्राव्य
प्रत्याश्राव्य ब्रह्मन्यजेति ब्राह्मणाच्छंस्यन्नं प्रेष्यति। इन्द्रायेदं अग्नये स्विष्टक
तइदं तं तं चमसमादाय आश्राव्य प्रत्याश्राव्य षोतर्यजेति पोतारं संप्रेष्य
ति। मरुद्भ्य इदं। अग्नये स्विष्टकृत इदं। आश्रा० अस्तु० नेष्टर्यजेति नेष्टा
रं संप्रेष्यति। त्वष्ट्र इदं। अग्नये स्विष्टकृत इदं। आश्रा० अस्तु० अग्नीद्यजे
त्याग्नीध्रं संप्रेष्यति। अग्नय इदं। अग्नये स्विष्टकृत इदं। तस्य च मसमादा
य सदो गच्छति सहोतुरग्न्याऽग्नी दिस्या च ष्टे होत्रा पूर्व पृष्ट श्चादिद्य मो
त्तरः। स भद्रमकर्यो नः सोमं पाययिष्यतीति होता प्रत्याह अध्वर्युः त्तर ॥१२४

क्षसंत्वा देव सोम सुचक्षा अव ख्येषं । इत्यवेक्ष्य । मंद्राभिभूतिः केतुर्यज्ञानां वा॰
शाली वाग्जुषाणा सोमस्य तृप्यतु इति प्रतिप्रस्थाता । रसुपहूय व्याघारको
ञं भक्षयति । हिन्व मे गात्रा॰ ति गाः इत्यासानमभिमृश्य पात्रं प्रक्षाल्य निधाप
यति । वाग्देवी सोमस्य पिबा लिहि वा भक्षमंत्रः सर्वत्र । अथाद्वृदेवत्यं भक्षयति ।
होता प्रथमो भक्षयति । ततोऽध्वर्युस्ततः प्रतिप्रस्थाता द्विरैंद्रवायवं भक्षयति ।
क्रमेण द्विर्वषट्कारकरणाद्धिः संप्रदानंत्तत्र ग्रहसंपातावनयनात् भक्षंभ
क्षमंत्रमावृत्य भक्षणं सकृत्सकृदितरो मैत्रावरुणाश्विनौ होता प्रथममैंद्र
वायवं भक्षयित्वानुसृजन्नेवाध्वर्यवे ददाति । अध्वर्युः भक्षे हि मा विश दीर्घा
युत्वाय शं॰ सोम प्रिया मे हृदो सि इति भक्षं प्रतीक्षते । अश्विनोस्त्वा वाहुभ्यां

॥१२८

॰स्मध्या सं। इति प्रतिगृह्य। न चक्षसं त्वा देव अवख्येषं। इत्यवेक्ष्य। होतरुपह्वयस्व।
प्रतिप्रस्थातरुपह्वयस्व। मन्द्राभिभूतिः केतुर्य० तुमन्द्रास्व० त्वेहि विश्वं च० या
[illegible]से। वसुमद्गणस्य सो० विदेः प्रातः० तो भक्षयामीति प्राणेषु पनिग्रा
ह्य वाग्देवी सोमस्यापि बलिरिति वा भक्षयति। अनुत्सृजन्नेव प्रतिप्रस्थात्रे प्रय
च्छति। हिन्व मे गात्रा हरि० मिमतिगाः। इत्यासाने प्रत्यभिमृशति। प्रतिप्रस्था
ता भक्षेहीत्यादिना भक्षं प्रतीक्ष्य अश्विनोरिति प्रतिगृह्य न चक्षसं त्वेत्यवेक्ष्य
मन्द्राभिभूतिरित्यनुद्रुत्य वसुमद्गणस्येति वाग्देवी सोमस्य विबलितिवा प्राणे
षु पनिग्राह भक्षयति हिन्व म इत्या[illegible]साने प्रत्यभिमृशति होतृचमसे किं
चिद्रवनीयानुत्सृजं तदेवमेव भक्षयति होतृचमसे सर्वं शेषमानीय पात्र

।२१२८

मुत्सृजति। एवं मैत्रावरुणस्य भक्षयंति सकृदेव होता प्रथमो भक्षयति अध्वर्यवे
प्रयच्छति। अध्वर्युः भक्षेहीत्यादिना प्रतीक्ष्याश्विनोरिति प्रतिगृह्य नृचक्षसं वे
त्ववेक्ष्य मंद्राभिभूतिरित्यनुकुर्यान्नृचक्षसो रुप निग्राह्य होतरुपहूयस्वेत्यादि व
सु मद्रूणस्येति वाग्देवीति वा भक्षयति हिन्व महत्याभिमद्यो ति भक्षयित्वानु हूम
न्नयुच्छति प्रतिप्रस्थातादि भक्षे हीत्यादि हिन्व महत्यासाभिमृद्यो नातं करो
ति। होतृचमसे सकृदेव नीयुपात्रमुत्सृजति। एवं मैत्राश्विनं दक्षिणे कर्णेऽ
पानिगृह्य सर्वतः प्रदक्षिणमास्यानं परिहृत्य वामे कर्णे उपनिगृह्य यथेतं
पुनः परिगृह्य भक्षयति सकृत्स्य पात्रं होतृचमसे वनयति। पुरोडाशशक
लमै द्रवाय वस्य पात्रेवदधाति। पयस्यां मैत्रावरुणस्य पात्रे धाना आश्वि

॥१२६

नस्यपात्रे। तानि पात्राणि हविर्धानस्यापरस्यां द्वाराक्प्राग्घोत्तरस्यां वर्तन्यां सा
दयति। आनतीयसवनाक्षरिंशे स्थले। उत्तरेणा हविर्धानं गत्वेडापात्रमुपस्तृ
र्येत्यादिकरोति यजमानभागमवदाय पृथग्गोपधमानिसृष्टां होतुर्निदधा
ति। लाजानां चतुर्धाकरणं। इडामवदायांगुलिपर्वणी अनक्ति होत्र इडामा
दधात् उपोपहूतं चमसांश्चमसाध्वर्यवः उपहूयमानां होतृचमस मास्थ
धारयति उपहूतायां ततः प्राशित्र भक्षणानन्तरं इडा शकलमप्स्वा वाका
य निदधाति। पूर्ववदिडां भक्षयति। यं प्रकृतावितिविच नात्मकृते सवनी
य पुरोडाशकर्मणि समवेता स्तदर्थ्यर्थः ततो मैत्रावरुणः प्रतिप्रस्थाता
च भक्षयित्वा मार्जयेतस्य भागः सह यजमानस्य स माः ततो हविः शेष

॥१२६

भक्षयंति।होत्रकाअग्रे भक्षयिष्यंति। तूष्णीं शाखां प्रहरति अथवा जिनेनप्रच्छ
रंतिव्याख्यातं पश्च होत रिवा जिनपात्र उपस्तीर्य भामेरित्यभिमृश्य बर्हिः पिंव
यंति व्याख्यातं पश्चहोत रिवा जिनपात्र उपस्तीर्य भामेरित्यभिमृश्यब्रूहि आश्रा·
पिंचन्वा जिनं सर्वंगृह्णाति। पूरयित्वा नाभिघारयति वाजिभ्योनुब्रूहि विच्छिन्द्यमान
अस्तु·वाजिनायजउर्ध्वजुरासानो हु।ता वषट्करोति वषट्कृते विच्छिन्द्यमानमिति वा।
याजुहोति।यजमा·वाजिभ्य इ·वाजिनामहं इदं·यं द्रियावाजं मानमिति वा।
अध्वर्युरनुवषट्कृते जुहोति। यज·अग्नये स्विष्टकृत इदं।अग्नेः स्विष्टक
तोहं इदं· आयुष्मा·अग्निर्मा दु॰ अध्वर्युः वाजिनोद्रेकेण दिशः प्रतियजति
दिशः स्वाहेतिपुरस्तात्·प्रदिशः स्वाहेतिदक्षिणतः·आदिशः स्वाहेतिप
श्चात् विदिशः स्वाहेत्युत्तरतः उद्दिशः स्वाहेतिमध्ये·स्वाहा दिग्भ्य इति

॥१२१॥ अप्रदक्षिणमनुपिंच जुहोति। नमो दिग्भ्य इत्युपतिष्ठते। यजमा॰ दिग्भ्य इद
प्रदिग्भ्यं आदिग्भ्यं विदिग्भ्य उद्दिग्भ्यं दिग्भ्य समुपहूय वाजिनं भ
क्षयंति। यजमानः प्रथम उत्तमो वा भक्षयति। वाजिनो भक्षो भवतु वाजो
अस्मा त्रेतः सिक्तम मृतत्व लायसनइ द्ररइदिंस द्रविणं दधातु मा रिषा
मवा जिनं भक्षयेत रत्नस्यैत वाजिना। जेभिर्भक्षंकृतस्य मधुमत उप॰
क्षयामीति वा जिन भक्षण मंत्रः ततः प्रतिप्रस्थाता पिष्टलेपफलीक
रण होमो जुहोति यजमानः प्रणीता सुमार्जयते प्रतिप्रस्थाता पवेषो
दस्लनं केपाल विमोचनं करोति। ततश्च मम भक्षः सर्वेषां प्रथमो होता
भक्षयतिं सकृत द्विःरवे च म मे प्रथमं रव च मसं अनुहूय भक्षयति। इत ॥१२२॥
१

रेषां चमसिनां चमसिनूपहूय भक्षयति होत्रकाणां चमसेषु तं तं चमसिनं मध्वर्युचो
पहूय भक्षयति। ततो होत्रका होत्रध्वर्युउपाहूय भक्षयंति। अध्वर्युश्च तस्य तस्य भक्ष
णानंतरं होतरि तस्मिंश्चोपहूय भक्षयंति ततो होता स्वं चमसमादायानुपहूय समा
ख्या भक्षं भक्षयति ततो मध्यतःकारिणः होतर्युपहूय समाख्या भक्षं भक्षयंति। हो
त्रका होतर्यध्वर्यौ चोपहूय समाख्या [illegible] भक्षयंति शेषं कुर्वतः तत्र श्लोकाः व
षण्तिभिस्तं सर्वेषां चमसानां सकल [illegible] तः होता दो भक्षयेत्स्वश्चोद्गात्रकाश्च य
थाय थां भक्षयेयुर्वै वषट्कारादध्वर्यु [illegible] प्रदानतः अतश्चमसिनः स्वं स्वं भक्ष
येयुः समाख्यायां तत्र होतुरुपाहूतं चमसे स्वेन विद्यते अभावाद्द्रोणा
होता होत्राचाध्वर्युणा सह उपहूयंते होत्रकाश्चमसेषु यथाक्रमं श्रीप्रयू

।१२८

पह्वे होतुर्भवे चमसिभिः सह । भक्षे हीत्यादि हृदयाभिमर्शनांते कृते च शेषितं
सोमान्सर्वान्भक्षितां श्चमसानाप्यायस्व समेतु ते० संगच्छे इति चमसिन
आप्याययंति । वसतीवरीभिः मंत्रे जपमात्रमित्येके लौकिक सोमरसेनेत्यन्ये
तेनाराशंसा भवंति ता नाराशंसानुदगायता दक्षिणस्य हविर्धानस्य प
श्चाद्दक्षं सादयति । अनंतरीनेष्टुरग्नीध्रस्य चमसो सादयेति उपविशत्य
च्छावाकेऽक्षोण स्वं धिष्ण्यं बहिः सदे संतरस्मे पुरोडाश शकलमादधदध्वर्यु
राह । अच्छावाक वदस्व यत्ते वाद्यमिति । ततो च्छावाकेनोपो स्मान्ब्राह्मणान्ब्रा
ह्मणाह्वयध्वमिच्छ्रिप्युच्यमाने । अध्वर्युः अच्छावाकोवायमुपह्वमिच्छतीति तं हो
तरुपह्वयस्वेति संप्रेष्यति यत्रैनं होत्रोपहूयमानं जानाति तस्मिन्काले अच्छ ॥१२९

वाक्चमसमादायोन्नीयमानायाध्वर्युं होतिसंप्रेष्यति चमसमुन्नेत्रप्रयच्छ
ति। उन्नीयमानसूक्ते परिहिते चमसं पुनरादाय आश्रा· अस्तु· अध्वर्यवा कंपु
जेतिसंप्रेष्यति वषट्कृते जुहोत्यनुवषट्कृते हुत्वा भक्षं हरति। यज· इंद्राग्नि
भ्यामि· अग्नयेस्विष्टकृते इ· न भक्षयति नास्मिन्नुपहवमिच्छते यद्यस्मिन्नुप
हवमिच्छते। भक्षयेत्येव ब्रूयात्। भक्षिताप्यायितमच्छावाकचमसं नेष्टराग्नी
ध्रस्य चमसांवं तत्तत्सादयेति। एतदेवात ऊर्ध्वमच्छावाकचमसस्य स्थानं।
अत एव ज्ञायते। सर्वत्राभियमानुपूर्विकाश्चमसा इति तेषां सादनोन्नयन
होमभक्षणाप्यायनेषु क्रमभेदे सति विपर्यये प्रायश्चित्तं कर्तव्यं सप्तमः
पटलः सतुग्रहैः प्रचरेत्ततो द्वादशभिस्त्रयोदशभिश्चतुर्दशभिर्वा सह

मथमो गृह्यते सहोत्तमा विधिश्रुति साधारण्येन प्रथमोत्तमानां सहग्रहणं

श्रूयमाणं मनसि द्रोणकलशात्कृत्वा होमस्यापि सहभावेक्षाप्ते व्यवस्था
माह। द्वादशसु सर्वेत्वानानुकूलः त्रयोदशस्वन्यतरेण सह चतुर्दशसु
सह प्रथमोत्तमो स होत्तमो रूयते तन्न सादनं अनासन्नाहूयते अन्यस्य होमआ
सादनमंत्रस्याश्रवणात्तु पूर्वस्य पूर्वस्येशोऽथ उत्तरेषु तरमभिगच्छोतः
स्वस्य पात्रे अध्वर्युर्द्रोणकलशात्परिष्ववेसा पत्नीयं उपयामगृहीतोसि म
धवेत्वेति स्वे पात्रे पूनम्रत उदंचनेनोन्नीयद्रोणकलशात्तमि धारयति ततः
प्रतिप्रस्थाताउपयाम० सिमाधवायत्वेति स्वे पात्रे तथैव परिपूर्वयो दंचन
योरेकत्वान्न सर्वथा सहग्रहणं संभवतीति सामध्योदेवमेव ग्रहणं। यदव्य

वधानेनमध्यमानां विशेषणं व्यतिषंकेण गुल्तं तत्र व्यतिषज्य व्यतिषज्य पर्यायेण
त्यर्थः अध्वर्योः प्रचारसमये प्रतिप्रस्थाता गृह्णातीति तात्पर्यार्थः तदिदमु
क्तं व्यतिषंगं गृहीतः प्रतिप्रस्थाता तत्रैव तिष्ठति अध्वर्युरत्याक्रम्याश्राव्य प्र
त्याश्राव्य सतु नो प्रेष्येति प्रेष्य वषट्कृते जुहोति। यजमानः इंद्राय मध्वत इ. अ
ध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ् हविर्धानमेति प्रतिप्रस्थाता पनिष्क्रामति प्रविशं
तमध्वर्युं ग्रहेण परिगृह्णाति। दक्षिणेन पात्रं हरन्नुत्तरेणोपनिष्क्रामति। आश्रा-
अस्तु। सतु नो प्रेष्य। वषट्कृते हुत्वा तदैन्द्रमत्येति मरुद्भ्यो माधवायेदं तथैवाध्व
र्युः परिप्लवया पत्नीयोपयाम गृहीतोऽसि शुक्राय त्वेति पूतभृत उदञ्चनेनोन्नी
य पूर्वस्य ग्रहस्यापरिगृहीतो पनिष्क्रामति तं निष्क्रामंतं प्रतिप्रस्थातारमध्व

१४०

युः पात्रेण परिगृह्णाति दक्षिणेन पात्रं हरन्नुत्तरेण प्रविशति। एवं सर्वे ऽग्रह
स चरहोमः अध्वर्युराश्राव्य प्रत्याश्राव्य सलुनाप्रेष्येति संप्रेष्य वषट्कृते
हुत्वा तथैव प्रत्येति। सद्युश्शुक्राय इदं प्रतिप्रस्थाता उपयामगृ॰ सि शुचये त्वे
ति चतुर्थं गृह्णाति। तथैवोपनिष्क्रम्याश्राव्य प्रत्याश्राव्य सलुनाप्रेष्येति सं
प्रेष्य वषट्कृते हुत्वा तथैव प्रत्येति। अग्नये शुचये इदं॰ अध्वर्युः परिप्लव
या परस्ता यं उपयाम॰ सि नभसे त्वेति पंचमं गृह्णाति। पृतमन्त उदंचनेनो
न्नीय गृहीत्वा द्रोणकलशादभिघार्य द्वारि प्रतिप्रस्थाता संगृह्णतः उप
निष्क्रम्याश्राव्य प्रत्याश्राव्य ऋतुनाप्रेष्येति संप्रेष्य वषट्कृते हुत्वा तथै
व प्रत्येति इंद्राय नभस इदं॰ प्रतिप्र॰ उपया॰ सि नभस्याय त्वेति षष्ठं गृह्णा ॥१४०